योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ६६

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

अतिशोकपराभूतौ तस्थतुर्दृढतापसौ ।

तापसंशुष्कसर्वाङ्गौ तावरण्यद्रुमाविव ।। १

विरक्तौ विपिने कालं क्षेपयामासतुर्द्विजौ ।

वियूथाविव सारङ्गावनास्थामागतौ पराम् ।। २

जग्मुर्दिनानि मासाश्च वर्षाण्यथ तयोस्तदा ।

क्रमाद्द्वावपि संयातौ जरां श्वभ्रद्रुमाविव ।। ३

अप्राप्तविमलज्ञानौ चिराज्जर्जरतापसौ ।

तावेकदा संघटिताविदमन्योन्यमूचतुः ।। ४

विलास उवाच ।

जीविताग्र्यद्रुमफल हृदावासामृताम्बुधे ।

जगत्यस्मिन्महाबन्धो भास स्वागतमस्तु ते ।। ५

एतावत्यो दिनावल्लयो मद्वियोगवता त्वया ।

वद क्व क्षपिताः साधो कच्चित्ते सफलं तपः ।। ६

कच्चित्ते विज्वरा बुद्धिः कच्चिज्जातस्त्वमात्मवान् ।

कच्चित्फलितविद्यस्त्वं कच्चित्कुशलवानसि ।। ७

श्रीवसिष्ठ उवाच ।

इत्युक्तवन्तं संसारसमुद्विग्नमलं तथा ।

प्राहाप्राप्तमहाज्ञानं सुहृत्सुहृदमादरात् ।। ८

भास उवाच ।

साधो स्वागततात्द्यैव दिष्ट्या दृष्टोऽसि मानद ।

कुशलं तु कुतोऽस्माकं संसारे तिष्ठतामिह ।। ९

यावन्नाधिगतं ज्ञेयं यावत्क्षीणा न चित्तभूः ।

यावत्तीर्णो न संसारस्तावन्मे कुशलं कुतः ।। १०

आशा यावदशेषेण न लूनाश्चित्तसंभवाः ।

वीरुधो दात्रकेणेव तावन्नः कुशलं कुतः ।। ११

यावन्नाधिगतं ज्ञानं यावन्न समतोदिता ।

यावन्नाभ्युदितो बोधस्तावन्नः कुशलं कुतः ।। १२

आत्मलाभं विना साधो विना ज्ञानमहौषधम् ।

उदेति पुनरेवेयं दुःसंसृतिविषूचिका ।। १३

शैशवाङ्कुरितोज्जृम्भान्नवयौवनपल्लवः ।

जराकुसुमितोऽभ्येति पुनः संसारदुर्द्रुमः ।। १४

कायजीर्णतरोरस्माद्बान्धवाक्रन्दषट्पदा ।

जराकुसुमितोदेति पुनर्मरणमञ्जरी ।। १५

भुक्तकर्मर्तुविरसा पुराणदिवसोम्भिता ।

नीयते नीरसप्राया पुनः संवत्सरावली ।। १६

महादरीषु देहाद्रेस्तृष्णाकण्टकितास्वपि ।

फलव्यालासु च पुनः क्रियासु परिलुठ्यते ।। १७

दुःखैः सुखलवाकारैर्दीर्घादीर्घैः शुभाशुभैः ।

अपर्याप्तागमापायाः प्रयान्त्यायान्ति रात्रयः ।। १८

अयथार्थक्रियारम्भैः कदाशावेशपल्लवैः ।

क्षीयते कर्मभिस्तुच्छैरायुराहतकर्मभिः ।। १९

उन्मूलिताश्रयालानो मनोमत्तमतङ्गजः ।

तृष्णाकरेणुकोन्निद्रो दूरं विपरिधावति ।। २०

जिह्वाचपलतालग्नः कायद्रुममहालये ।

पतच्चिन्तामणौ वृद्धो गर्द्धगृध्रो विवर्धते ।। २१

नीरसा निःसुखा लघ्वी पतत्पेलवगात्रिका ।
जीर्णपर्णसवर्णेयं क्षीयते दिवसावली ।। २२
अवमानरजोध्वस्तमस्तंगतवपुःश्रियम् ।
मुखं धूसरतामेति हिमैः पद्ममिवाहतम् ।। २३
शुष्यतः कायसरसः प्रगलद्यौवनाम्भसः ।
राजहंसः क्षणादायुरनिवर्ति पलायते ।। २४
कालानिलबलोद्धूताज्जर्जराज्जीवितद्रुमात् ।
भोगपुष्पाणि दिवसपर्णानि निपतन्त्यधः ।। २५
भोगभोगिश्रितेष्वन्तर्दुःखदर्दुरधारिषु ।
मनोमोहान्धकूपेषु पूरेषु विनिमज्जति ।। २६
नानानुरञ्जनास्पृष्टा तृष्णा तरलपेलवा ।
चैत्यमग्रपताकेव दूरं समधिरोहति ।। २७
अस्य संसारतन्त्रस्य बृहत्कालविलास्पदः ।
जीविताशामयं तन्तुमन्तकाखुर्निकृन्तति ।। २८
यौवनोत्कटकल्लोला वहल्लोलासिफेनिला ।
परावर्तमहावर्ता याति जीवितदुर्नदी ।। २९
कलाकुलजगत्कार्यकल्लोलाकुलसंकुला ।
क्रियासरिदपर्यन्ता वहत्याकुलकोटरा ।। ३०
अनन्ता बन्धुजनतानद्यो गम्भीरकोटरे ।
अजस्रं निपतन्त्येता वितते कालसागरे ।। ३१
देहरत्नशलाकेयं नाशपङ्कार्णवोदरे ।
न ज्ञायते क्व मग्नेति तात जन्मनि जन्मनि ।। ३२
चिन्ताचक्रे चिरं बद्धं कुक्रियाचारचञ्चुरम् ।
चेतो भ्रमति सामुद्रे गर्तावर्ते तृणं यथा ।। ३३
उह्यमानमनन्तेषु चेतः कार्यमहोर्मिषु ।
क्षणमेति न विश्रान्तिं चिन्तताण्डविताशयम् ।। ३४

इदं कृतं करोमीदं करिष्यामीदमित्यलम् ।

कलनाजालवलिता मूर्च्छिता मतिपक्षिणी ।। ३५

अयं सुहृदयं शत्रुरिति द्वन्द्वमहाद्विपः ।

विनिकृन्तति मर्माणि यथा नीलोत्पलानि मे ।। ३६

चिन्तानद्या महावर्ते वीचिकानिचये चिरम् ।

क्षणादुच्छूनतामेति मनोमीनः क्षणाद्गतिः ।। ३७

अनात्मीयानि दुःखानि बहून्येवंविधान्ययम् ।

आत्मबुद्ध्या विचिन्वानो जनो गच्छति दीनताम् ।।

बहुविधसुखदुःखमध्यपाती

विततजरामरणप्रवातभग्नः ।

जगदुदरगिरौ लुठञ्जनोऽयं

गतरसपर्णवदेति जर्जरत्वम् ।। ३९

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० उपशमप्रकरणे भासविलासवृत्तान्ते अनित्यताप्रतिपादनं नाम षट्षष्टितमः सर्गः ६६